# Sree Lakshmi Ashtottara Satanaama Stotram

देव्युवाच

देवदेव! महादेव! त्रिकालज्ञ! महेश्वर!
करुणाकर देवेश! भक्तानुग्रहकारक! ॥
अष्टोत्तर शतं लक्ष्म्याः श्रोतुमिच्छामि तत्त्वतः ॥

ईश्वर उवाच

देवि! साधु महाभागे महाभाग्य प्रदायकं॥
सर्वैश्वर्यकरं पुण्यं सर्वपाप प्रणाशनम्॥
सर्वदारिद्र्य शमनं श्रवणाद्भुक्ति मुक्तिदम्॥
राजवश्यकरं दिव्यं गुह्याद्-गुह्यतरं परं ॥
दुर्लभं सर्वदेवानां चतुष्षष्टि कलास्पदम् ॥
पद्मादीनां वरान्तानां निधीनां नित्यदायकम् ॥
समस्त देव संसेव्यं अणिमाद्यष्ट सिद्धिदं ॥
किमत्र बहुनोक्तेन देवी प्रत्यक्षदायकं ॥
तव प्रीत्याद्य वक्ष्यामि समाहितमनाश्शृणु ॥
अष्टोत्तर शतस्यास्य महालक्ष्मिस्तु देवता ॥
क्लीं बीज पदमित्युक्तं शक्तिस्तु भुवनेश्वरी ॥
अङ्गन्यासः करन्यासः स इत्यादि प्रकीर्तितः ॥

ध्यानम्

वन्दे पद्मकरां प्रसन्नवदनां सौभाग्यदां भाग्यदां
हस्ताभ्यामभयप्रदां मणिगणैः नानाविधैः भूषितां ॥
भक्ताभीष्ट फलप्रदां हरिहर ब्रह्माधिभिस्सेवितां
पार्श्वे पङ्कज शङ्खपद्म निधिभिः युक्तां सदा शक्तिभिः ॥

सरसिज नयने सरोजहस्ते धवल तरांशुक गन्धमाल्य शोभे ||
भगवति हरिवल्लभे मनोज्ञे त्रिभुवन भूतिकरि प्रसीदमह्यम् ||

प्रकृतिं, विकृतिं, विद्यां, सर्वभूत हितप्रदां ||
श्रद्धां, विभूतिं, सुरभिं, नमामि परमात्मिकाम् ||

वाचं, पद्मालयां, पद्मां, शुचिं, स्वाहां, स्वधां, सुधां ||
धन्यां, हिरण्ययीं, लक्ष्मीं, नित्यपुष्टां, विभावरीम् ||

अदितिं च, दितिं, दीप्तां, वसुधां, वसुधारिणीं ||
नमामि कमलां, कान्तां, क्षमां, क्षीरोद सम्भवाम् ||

अनुग्रहपरां, बुद्धिं, अनघां, हरिवल्लभां ||
अशोका,ममृतां दीप्तां, लोकशोक विनाशिनीम् ||

नमामि धर्मनिलयां, करुणां, लोकमातरं ||
पद्मप्रियां, पद्महस्तां, पद्माक्षीं, पद्मसुन्दरीम् ||

पद्मोद्भवां, पद्ममुखीं, पद्मनाभप्रियां, रमां ||
पद्ममालाधरां, देवीं, पद्मिनीं, पद्मगन्धिनीम् ||

पुण्यगन्धां, सुप्रसन्नां, प्रसादाभिमुखीं, प्रभां ||
नमामि चन्द्रवदनां, चन्द्रां, चन्द्रसहोदरीम् ||

चतुर्भुजां, चन्द्ररूपां, इन्दिरा,मिन्दुशीतलां ||
आह्लाद जननीं, पुष्टिं, शिवां, शिवकरीं, सतीम् ||

विमलां, विश्वजननीं, तुष्टिं, दारिद्र्य नाशिनीं ||
प्रीति पुष्करिणीं, शान्तां, शुक्लमाल्याम्बरां, श्रियम् ||

भास्करीं, बिल्वनिलयां, वरारोहां, यशस्विनीं ||
वसुन्धरा, मुदाराङ्गां, हरिणीं, हेममालिनीम् ||

धनधान्यकरीं, सिद्धिं, स्त्रैणसौम्यां, शुभप्रदां ||
नृपवेश्म गतानन्दां, वरलक्ष्मीं, वसुप्रदाम् ||

शुभां, हिरण्यप्राकारां, समुद्रतनयां, जयां ||
नमामि मङ्गलां देवीं, विष्णु वक्षःस्थल स्थिताम् ||

विष्णुपत्नीं, प्रसन्नाक्षीं, नारायण समाश्रितां ||
दारिद्र्य ध्वंसिनीं, देवीं, सर्वोपद्रव वारिणीम् ||

नवदुर्गां, महाकालीं, ब्रह्म विष्णु शिवात्मिकां ||
त्रिकालज्ञान सम्पन्नां, नमामि भुवनेश्वरीम् ||

लक्ष्मीं क्षीरसमुद्रराज तनयां श्रीरङ्गधामेश्वरीं ||
दासीभूत समस्तदेव वनितां लोकैक दीपाङ्कुराम् ||
श्रीमन्मन्द कटाक्ष लब्ध विभवद्-ब्रह्मेन्द्र गङ्गाधरां ||
त्वां त्रैलोक्य कुटुम्बिनीं सरसिजां वन्दे मुकुन्दप्रियाम् ||

मातर्नमामि! कमले! कमलायताक्षि!
श्री विष्णु हृत्-कमलवासिनि! विश्वमातः!
क्षीरोदजे कमल कोमल गर्भगौरि!
लक्ष्मी! प्रसीद सततं समतां शरण्ये ||

त्रिकालं यो जपेत् विद्वान् षण्मासं विजितेन्द्रियः ||
दारिद्र्य ध्वंसनं कृत्वा सर्वमाप्नोत्-ययत्नतः ||
देवीनाम सहस्रेषु पुण्यमष्टोत्तरं शतं ||
येन श्रिय मवाप्नोति कोटिजन्म दरिद्रतः ||

भृगुवारे शतं धीमान् पठेत् वत्सरमात्रकं ॥
अष्टैश्वर्य मवाप्नोति कुबेर इव भूतले ॥
दारिर्द्य मोचनं नाम स्तोत्रमम्बापरं शतं ॥
येन श्रिय मवाप्नोति कोटिजन्म दरिद्रतः ॥

भुक्त्वातु विपुलान् भोगान् अन्ते सायुज्यमाप्नुयात् ॥
प्रातःकाले पठेन्नित्यं सर्व दुःखोप शान्तये ॥
पठन्तु चिन्तयेद्देवीं सर्वाभरण भूषिताम् ॥

इति श्री लक्ष्मी अष्टोत्तर शतनाम स्तोत्रं सम्पूर्णम् ॥

InstaAstro